॥ नक्षत्र सूक्तम्॥

## कृत्तिका

अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासंजुहोतन । यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभिसंवशानः। अग्निर्नो देवस्सुविते दधातु । कृत्तिका नक्षत्र देवताय अग्नये नमः।

अग्नये स्वाहा । कृत्तिकाभ्य स्वाहा । अम्बायै स्वाहा । दुलायै स्वाहा । नितत्न्यै स्वाहा । अभ्रयन्त्यै स्वाहा । मेघयन्त्यै स्वाहा । वर्षयन्त्यै स्वाहा । चुपुणीकायै स्वाहा ।

## रोहिणी

प्रजापते रोहिणीवेतु पत्नी । विश्वरूपा बृहतीचित्रभानुः। सा नो यज्ञस्य सुविते दधातु । यथाजीवेम शरदस्सवीराः। रोहिणीदेव्युदगात्पुरस्तात् । विश्वारूपाणि प्रतिमोद माना । प्रजापतिग्ं हविषा वर्धयन्ती । प्रिया देवाना मुपयातु यज्ञम्।
रोहिणी नक्षत्र देवताय प्रजापतये नमः ।

प्रजापतये स्वाहा । रोहिण्यै स्वाहा । रोचमानायै स्वाहा । प्रजाभ्यस्वाहा ।

## मृगशिरा

सोमोराजा मृगशीर्षेण अ्गन् । शिवं नक्षत्रं प्रियमस्यधाम । आप्यायमानोबहुधा जनेषु । रेतः प्रजां यजमाने दधात । यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियग्ं राजन् प्रियतमं प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शञ्चतुष्पदे ।
मृगशिरो नक्षत्र देवताय सोमाय नमः।

सोमाय स्वाहा । मृगशीर्षाय स्वाहा । इण्वकाभ्य स्वाहा । ओषधीभ्य स्वाहा । राज्याय स्वाहा । अभिजित्यै स्वाहा ।

## आर्द्रा

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानाम् । नक्षत्रमस्य हविषा विधेम । मानःप्रजाग्ं रीरिषन्मोत वीरान् । हेती रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषताग्ं हविर्नः। प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशग्ं सन्नुदतामरातिं ।
आर्द्रा नक्षत्र देवताय रुद्राय नमः।

रुद्राय स्वाहा । आर्द्रायै स्वाहा । पिन्वमानायै स्वाहा । पशुभ्य स्वाहा ।

## पुनर्वसु

पुनर्नो देव्यदितिस्पृणोतु । पुनर्वसूनः पुनरेतां यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः। एवानदेव्यदिति रनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियन्देवानामप्येतु पाथः।
पुनर्वसु नक्षत्र देवताय अदितये नमः।

अदित्यै स्वाहा । पुनर्वसुभ्याग् स्वाहा । अभूत्यै स्वाहा । प्रजात्यै स्वाहा ।

## पुष्या

बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्र मभिसम्बभूव । श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशोनुसर्वा अभयन्नो अस्तु । तिष्यः पुरस्तादुत मध्यतोनः। बृहस्पतिर्नः परिपातु पश्चात् । बाधेतां द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयस्याम ।
पुष्य नक्षत्र देवताय बृहस्पतये नमः।

बृहस्पतये स्वाहा । तिष्याय स्वाहा । ब्रह्म वर्चसाय स्वाहा । अभिजित्यै स्वाहा ।

### रेवति

पूषा रेवत्यन्वेति पन्थाम् । पुष्टिपती पशुपा वाजबस्त्यौ । इमानि हव्या प्रयता जुषाणा । सुगैर्नो यानैरुपयातां यज्ञम् । क्षुद्रान् पशून्रक्षतु रेवतीनः। गावो नो अश्वाग्ं अन्वेतु पूषा । अन्नग्ं रक्षन्तौ बहुधाविरूपम् । वाजग्ं सनुतां यजमानाय यज्ञम् ।

रेवति नक्षत्र देवताय पूष्णे नमः।

पूष्णे स्वाहा । रेवत्यै स्वाहा । पशुभ्यः स्वाहा ।

### अश्विनी

तदश्विनावश्वयुजोपयाताम् । शुभन्ग मिष्टौ सुयमेभि रश्वैः। स्वं नक्षत्रग्ं हविषा यजन्तौ । मध्वा सम्पृक्तौ यजुषा समक्तौ । यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूतावमृतस्य गोपौ ।

तौ नक्षत्रं जुजुषाणोपयाताम् । नमोश्विभ्यां कृणुमोश्वयुग्भ्याम् ।

अश्विनी नक्षत्र देवताभ्यां अश्विभ्यां नमः।

अश्विग्भ्याग् स्वाहा । अश्वयुग्भ्याग् स्वाहा । श्रोत्राय स्वाहा । श्रुत्यै स्वाहा।

### अपभरणी

अप पाप्मानं भरणीर्भरन्तु । तद्यमो राजा भगवान् विचष्टाम् । लोकस्य राजा महतो महान् हि । सुगं नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यमएति राजा यस्मिन्नेन मभ्यषिंचन्त देवाः। तदस्य चित्रग्ं हविषा यजाम । अप पाप्मानं भरणीर्भरन्तु ।

अपभरणी नक्षत्र देवताय यमाय नमः।

यमाय स्वाहा । अपभरणीभ्य स्वाहा । राज्याय स्वाहा । अभिजित्यै स्वाहा

इति नक्षत्र सूक्तम्।

## उत्तराषाढा

तन्नो विश्वे उपशृण्वन्तु देवाः। तदषाढा अभिसंयन्तु यज्ञम् । तन्नक्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टिर्यजमानाय कल्पताम् । शुभ्राः कन्या युवतयस्सुपेशसः। कर्मकृतस्सुकृतो वीर्यावतीः । विश्वान्देवान् हविषा वर्धयन्तीः। अषाढाः काम मुपयान्तु यज्ञम् ।
उत्तराषाढा नक्षत्र देवेभ्यो विश्वेभ्यो देवेभ्यो नमः।

विश्वेभ्यो देवेभ्य स्वाहा । अषाढाभ्य स्वाहा । अनपजय्याय स्वाहा । जित्यै स्वाहा ।

## श्रवणा

श्रृण्वन्ति श्रोणाममृतस्य गोपाम् । पुण्यामस्या उपश्रृणोमि वाचम् । महीं देवीं विष्णुपत्नी मजूर्याम् । प्रतीचीमेनाग्ं हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे । महीन्दिवं पृथिवीमन्तरिक्षम् । तच्छ्रोणैतिश्रव इच्छमाना । पुण्यग् श्लोकं यजमानाय कृण्वती ।
श्रवण नक्षत्र देवताय विष्णवे नमः।

विष्णवे स्वाहा । श्रोणायै स्वाहा । श्लोकाय स्वाहा । श्रुताय स्वाहा ।

## श्रविष्ठा

अष्टौ देवा वसवस्सोम्यासः। चतस्रो देवी रजराश्रविष्ठाः। ते यज्ञं पान्तु रजसःपरस्तात् । संवत्सरीण ममृतग् स्वस्ति । यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतोभियन्तु श्रविष्ठाः। पुण्यन्नक्षत्र मभिसंविशाम । मानो अराति रघशग्ं सागन् ।
श्रविष्ठा नक्षत्र देवताभ्यः वसुभ्यो नमः।

वसुभ्य स्वाहा । श्रविष्ठाभ्य स्वाहा । अग्राय स्वाहा । परीत्यै स्वाहा ।

## शतभिषग्

क्षत्रस्य राजा वरुणोधिराजः। नक्षत्राणाग्ं शतभिषग् वसिष्टः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतग्ं सहस्रा भेषजानि धत्तः। यज्ञन्नोराजा वरुण उपयातु । तन्नो विश्वे अभिसंयन्तु देवाः। तन्नो नक्षत्रग्ं शतभिषग्जुषाणम् । दीर्घमायुः प्रतिरद्भेषजानि ।
शतभिषग् नक्षत्र देवताय वरुणाय नमः।

वरुणाय स्वाहा । शतभिषजे स्वाहा । भेषजेभ्य स्वाहा ।

## पूर्व प्रोष्ठपदा

अज एकपादुदगात्पुरस्तात् । विश्वाभूतानि प्रतिमोदमानः। तस्य देवाः प्रसवं यन्ति सर्वे । प्रोष्ठपदासो अमृतस्य गोपाः। विभ्राजमानस्समिधान उग्रः। आन्तरिक्ष मरुहद गन्द्याम् । तग् सूर्यं देवमजमेक पादम् । प्रोष्ठपदासो अनुयन्ति सर्वे ।
पूर्व प्रोष्ठपदा नक्षत्र देवताय अजएकपदे नमः।

अजायैक पदे स्वाहा । प्रोष्ठपदेभ्य स्वाहा । तेजसे स्वाहा । ब्रह्मवर्चसाय स्वाहा ।

## उत्तर प्रोष्ठपदा

अहिर्बुध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणाम् । तं ब्राह्मणा स्सोमपा स्सोम्यासः। प्रोष्ठपदासो अभिरक्षन्ति सर्वे । चत्वार एक मभिकर्म देवाः। प्रोष्ठपदास इतियान् वदन्ति । ते बुध्नियं परिषद्यग् स्तुवन्तः। अहिग् रक्षन्ति नमसोपसद्य ।
उत्तर प्रोष्ठपदा नक्षत्र देवताय अहिर्बुध्नियाय नमः।

अहये बुध्नियाय स्वाहा । प्रोष्ठपदेभ्य स्वाहा । प्रतिष्ठायै स्वाहा ।

## श्वाति

वायुर्नक्षत्रमभ्येति निष्ट्याम् । तिग्मशृङ्गो वृषभो रोरुवाणः। समीरयन्भुवना मातरिश्वा । अप द्वेषाग्ंसि नुदतामरातीः। तन्नो वायुस्तदु निष्ट्या शृणोतु । तन्नक्षत्रं भूरिदा अस्तुमह्यम् । तन्नो देवासो अनुजानन्तु कामम् । यथातरेम दुरितानि विश्वा ।
श्वाति नक्षत्र देवताय वायवे नमः।

वायवे स्वाहा । निष्ट्यायै स्वाहा । कामचाराय स्वाहा । अभिजित्यै स्वाहा

## विशाखा

दूरमस्मच्छत्रवोयन्तु भीताः। तदिन्द्राग्नी कृणुतां तद्विशाख । तन्नो देवा अनुमदन्तु यज्ञम् । पश्चात्पुरस्तादभयन्नो अस्तु । नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविन्द्रग्नी भुवनस्य गोपौ । विषूचश्शत्र_नपबाधमानौ । अपक्षुधन्नुदतामरातिम् ।
विशाखा नक्षत्र देवताभ्यां इन्द्राग्निभ्यां नमः।

इन्द्राग्निभ्याग् स्वाहा । विशाखाभ्याग् स्वाहा । श्रैष्ठ्याय स्वाहा । अभिजित्यै स्वाहा ।

## अनूराधा

ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्र धेयन्नो अस्तु । अनूराधान् हविषावर्धयन्तः। शतंजीवेम शरदः सवीराः। चित्रं नक्षत्र मुदगात्पुरस्तात् । अनूराधास इति यद्वदन्ति । तन्मित्रएति पथिभिर्देवयानैः। हिरण्ययैर्विततैरन्तरिक्षे ।
अनूराधा नक्षत्र देवताय मित्राय नमः।

मित्राय स्वाहा । अनूराधेभ्य स्वाहा । मित्रधेयाय स्वाहा । अभिजित्यै स्वाहा।

## ज्येष्ठा

इन्द्रो ज्येष्ठामनुनक्षत्रमेति । यस्मिन्वृत्रं वृत्रतूर्ये ततार । तस्मिन्वयममृतं दुहानाः। क्षुधन्तरेम दुरितिं दुरिष्टिम् । पुरन्दराय वृषभाय धृष्णवे । अषाढायसहमानाय मीढुषे । इन्द्राय ज्येष्ठामधुमद्दुहाना । उरुंकृणोतु यजमानाय लोकम् ।
ज्येष्ठा नक्षत्र देवताय इन्द्राय नमः।

इन्द्राय स्वाहा । ज्येष्ठायै स्वाहा । ज्यैष्ठ्याय स्वाहा । अभिजित्यै स्वाहा ।

## मूला

मूलं प्रजां वीरवतीं विदेय । परा च्येतु निर्ऋतिः पराचा । गोभिर्नक्षत्रं पशुभिस्समक्तम् । अहर्भूयाद्यजमानाय  मह्यम् । अहर्नो अद्य सुविते दधातु। मूलन्नक्षत्रमितियद्वदन्ति । पराचींवाचा निर्ऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यम्।
मूला नक्षत्र देवताय प्रजापतये नमः।

प्रजापतये स्वाहा । मूलाय स्वाहा । प्रजायै स्वाहा ।

## पूर्वाषाढा

या दिव्या आपः पयसा सम्बभूवुः। या अन्तरिक्ष उतपार्थिवीर्याः। यासा मषाढा अनुयन्ति कामम् । तान अ्पस्सग्स्योनाभवन्तु । याश्च कूप्या याश्च नाद्या स्समुद्रियाः। यास्च वैशन्ती रुतप्रासचीर्याः। यासामषाढामधु भक्षयन्ती । तान आप शग् स्योना भवन्तु ।
पूर्वाषाढा नक्षत्र देवताय आपाय नमः।

अद्भ्य स्वाहा । अषाढाभ्य स्वाहा । समुद्राय स्वाहा । कामाय स्वाहा । अभिजित्यै स्वाहा ।

## आश्लेषा

इदग्ं सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषायेषामनुयन्ति चेतः। ये अन्तरिक्षं पृथिवीं क्षियन्ति । तेनस्सर्पासो हवमाग मिष्ठाः। ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवी मनुसन्चरन्ति । येषामाश्रेषा अनुयन्ति कामम् ।
तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि ।
आश्लेषा नक्षत्र देवताभ्यः सर्पेभ्यो नमः।

सर्पेभ्य स्वाहा । आश्रेषाभ्य स्वाहा । दन्तशूकेभ्य स्वाहा ।

## मघा।

उपहूताः पितरो ये मघासु । मनोजवसः सुकृतस्सुकृत्याः। ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुषन्ताम् । ये अग्नि दग्धा ये अनग्नि दग्धाः। ये मुन्लोकं पितरः क्षियन्ति । याग् स्च विद्मयाग्ं उ चन प्रविद्म ।
मघासु यज्ञग्ं सुकृतं जुषन्ताम् ।
मघा नक्षत्र देवताभ्यः पितृभ्यो नमः।

पितृभ्य स्वाहा । मघाभ्य स्वाहा । अनघाभ्य स्वाहा । अगदाभ्य स्वाहा ।
अरुन्धतीभ्य स्वाहा ।

## पूर्व फल्गुनी।

गवां पतिः फल्गुनीना मसित्वम् । तदर्यमन्वरुण मित्रचारु । तन्त्वा वयग्ं सनितारग्ं सनीनाम् । जीवा जीवन्त मुपसंविशेम । येनेमा विश्वाभुवनानि सन्जिता । यस्य देवा अनुसम्यन्ति चेतः। अर्यमा राजा जरस्तु विष्मान् ।
फल्गुनीना मृषभोरोरवीति ।
पूर्व फल्गुनी नक्षत्र देवताय अर्यम्णे नमः।

अर्यम्णे स्वाहा । फल्गुणीभ्याग् स्वाहा । पशुभ्य स्वाहा ।

## उत्तर फल्गुनी

श्रेष्टो देवानां भगवो भगासि । तत्वाविदुः फल्गुनीस्तस्य वित्तात् । अस्मभ्यं क्षत्रमजरग्ं सुवीर्यम् । गोमदश्वव दुपसन्नु देह । भगो ह दाता भग इत्प्रदाता । भगो देवीः फल्गुनीराविवेश । भगस्येत्तं प्रसवंगमेम । यत्र देवैस्सधमादं मदेम ।
उत्तर फल्गुनी नक्षत्र देवताय भगाय नमः।

भगाय स्वाहा । फल्गुनीभ्याग् स्वाहा । श्रैष्ठ्यायै स्वाहा । अभिजित्यै स्वाहा ।

## हस्ता

आयातु देवस्सवितो पयातु । हिरण्ययेन सुवृता रथेन । वहन् हस्तग्ं सुभगं विद्मनापसम् । प्रयच्छन्तं पपुरिं पुण्यमच्छ । हस्तः प्रयच्छ त्वमृतं वसीयः। दक्षिणेण प्रतिगृभ्णीम एनत् । दातारमद्य सविता विदेय ।
यो नो हस्ताय प्रसुवाति यज्ञम् ।
हस्ता नक्षत्र देवताय सवित्रे नमः।

सवित्रे स्वाहा । हस्ताय स्वाहा । आदते स्वाहा । आपृणते स्वाहा ।
अप्रयच्छते स्वाहा । अप्रतिगृभ्नते स्वाहा ।

## चित्रा

त्वष्टानक्षत्र मभ्येति चित्राम् । सुभग्ं ससंयुवतिग्ं रोचमानाम् ।
निवेशयन्नमृतान् मर्त्याग्ंश्च । रूपाणि पिग्ंशन् भुवनानि विश्वा । तन्नस्त्वष्टा तदुचित्रा विचष्टाम् । तन्नक्षत्रं भूरिदा अस्तुमह्यम् ।
तन्नप्रजां वीरवतीग्ं सनोतु । गोभिर्नो अश्वैस्समनक्तु यज्ञम् ।
चित्रा नक्षत्र देवताय त्वष्ट्रे नमः।

त्वष्ट्रे स्वाहा । चित्रायै स्वाहा । चैत्राय स्वाहा । प्रजायै स्वाहा ।

॥ नक्षत्र सूक्तम्॥

## कृत्तिका

अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासंजुहोतन । यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभिसंवशानः। अग्निर्नो देवस्सुविते दधातु । कृत्तिका नक्षत्र देवताय अग्नये नमः।

अग्नये स्वाहा । कृत्तिकाभ्य स्वाहा । अम्बायै स्वाहा । दुलायै स्वाहा । नितल्यै स्वाहा । अभ्रयन्त्यै स्वाहा । मेघयन्त्यै स्वाहा । वर्षयन्त्यै स्वाहा । चुपुणीकायै स्वाहा ।

## रोहिणी

प्रजापते रोहिणीवेतु पत्नी । विश्वरूपा बृहतीचित्रभानुः। सा नो यज्ञस्य सुविते दधातु । यथाजीवेम शरदस्सवीराः। रोहिणीदेव्युदगात्पुरस्तात् । विश्वारूपाणि प्रतिमोद माना । प्रजापतिग् हविषा वर्धयन्ती । प्रिया देवाना मुपयातु यज्ञम्।
रोहिणी नक्षत्र देवताय प्रजापतये नमः ।

प्रजापतये स्वाहा । रोहिण्यै स्वाहा । रोचमानायै स्वाहा । प्रजाभ्यस्वाहा ।

## मृगशिरा

सोमोराजा मृगशीर्षेण अ्गन् । शिवं नक्षत्रं प्रियमस्यधाम । आप्यायमानोबहुधा जनेषु । रेतः प्रजां यजमाने दधात । यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियग् राजन् प्रियतमं प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शञ्चतुष्पदे ।
मृगशिरो नक्षत्र देवताय सोमाय नमः।

सोमाय स्वाहा । मृगशीर्षाय स्वाहा । इण्वकाभ्य स्वाहा । ओषधीभ्य स्वाहा । राज्याय स्वाहा । अभिजित्यै स्वाहा ।

## आर्द्रा

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानाम् । नक्षत्रमस्य हविषा विधेम । मानःप्रजाग् रीऋषन्मोत वीरान् । हेती रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषताग् हविर्नः। प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशग् सन्नुदतामरातिं ।
आर्द्रा नक्षत्र देवताय रुद्राय नमः।

रुद्राय स्वाहा । आर्द्रायै स्वाहा । पिन्वमानायै स्वाहा । पशुभ्य स्वाहा ।

## पुनर्वसु

पुनर्नो देव्यदितिस्पृणोतु । पुनर्वसूनः पुनरेतां यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः। एवानदेव्यदिति रनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियन्देवानामप्येतु पाथः।
पुनर्वसु नक्षत्र देवताय अदितये नमः।

अदित्यै स्वाहा । पुनर्वसुभ्याग् स्वाहा । अभूत्यै स्वाहा । प्रजात्यै स्वाहा ।

## पुष्या

बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्र मभिसम्बभूव । श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशोनुसर्वा अभयन्नो अस्तु । तिष्यः पुरस्तादुत मध्यतोनः। बृहस्पतिर्नः परिपातु पश्चात् । बाधेतां द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयस्याम ।
पुष्य नक्षत्र देवताय बृहस्पतये नमः।

बृहस्पतये स्वाहा । तिष्याय स्वाहा । ब्रह्म वर्चसाय स्वाहा । अभिजित्यै स्वाहा ।